Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

BJ

॥ श्रीशः शरणम् ॥

मधुरवाणी.

सुधानिष्यन्दिन्या मधुरमधुरालापकलया
खलावज्ञामूर्च्छाभरमपहरन्ती सुरगिरः ।
मनोज्ञालङ्कारा रसिकजनचेतांसि सहसा
वशीकुर्वाणेयं भुवि मधुरवाणी विजयते ॥

१४ वर्षे] वेळगांव १८७१ शकस्य [६ सञ्चिका

राधाधरमधुस्यन्दमिलिन्दाय मधुद्विषे ।
कृष्णापटकुविन्दाय गोविन्दाय नमोऽस्तु नः ॥

मङ्गलम्

श्रुत्वा वारिदगर्जितं, विलसितं विद्युल्लतायास्तथा
दृष्ट्वा भीत इवैष भाति तदमुं राधे ! गृहान्तर्नय ॥
इत्थं नन्दवचो निशम्य तरसा गेहान्तराविष्टयो
राधा–माधवयोस्तटिज्जलधरच्छायाऽस्तु नः श्रेयसे ॥१॥

सोत्साहं हलधारिणा सकरुणं नन्दादिगोपालकैः
सोद्वेगं पशुभिर्निराशमभितश्चाभीरभामाजनैः ॥
साशोकं फणियौवतेन सभयं कालाहिनाऽऽलोकिताः
कल्याणं कलयन्तु कालियफणाभृच्छासिनः केलयः ॥२॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उन्नीतासु फणासु कोमलपदन्यासैः कृते ताण्डवे
श्रीवृन्दारकसुन्दरीभिरभितो मन्दारमालार्चिताः ॥
प्रेमाकूतभरैरपाङ्गललितैर्गोपीभिरुत्तेजिताः
कल्याणं कलयन्तु .... ॥३॥

साश्वासं विकसद्वृदब्जमुकुलैरुल्लासफुल्लाननै-
र्नन्दाद्यैर्व्रजवासिभिः सवनितैः सोत्कण्ठमुत्प्रेक्षिताः॥
उद्वेलप्लवमानबालकगणैः कोलाहलोत्तोलिताः
कल्याणं कलयन्तु ४

पुच्छानि द्रुतमुन्नमय्य परितो धावद्भिरत्युत्सुकैः
कृत्वा स्वागतमादृताश्च पशुभिर्हम्बारवाम्रेडितैः ॥
सानन्दाश्रुकलैर्दृगञ्चलपुटैः पेपीयमाना मुहुः .
कल्याणं कलयन्तु कालियफणाभृच्छासिनः केलयः ॥५॥

मासावतरणिका

भक्त्या देवमनन्तमर्चयसि यल्लम्बोदरं चाप्यृषीन्
श्रीमद्भागवतं पुराणममलं संश्रावयस्यादरात् ॥
श्राद्धैस्तर्पयसे पितॄनथ जनान्वृष्ट्या च हृष्टात्मनो
व्यक्तं भाद्रपदाद्य भद्रपदतः सार्थाभिधानो भवान् ॥१॥

अन्योक्तिः

सौकर्यस्य मिषेण न त्वमलुनाः शोभावहान्केसरान्
नो वा प्रावसु घर्षणेन नखगं नैशित्यमन्वच्छिदः ॥
नान्तर्वैपनिकभ्रमात्त्वमजहाः स्वत्वं च सत्वं पुनः
तस्मात्ते वनराजता स्थिरतरा पञ्चास्य ! सर्वादृता ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

काश्मीर! का वा भवितव्यता ते ?

सकलविद्यादेवीविहारभूमे, श्रीहर्षादिनैककविमूर्धन्यमणिजन्मभूमे श्रीहर्षवर्धनादि वीरोत्तंसप्रसवभाग्यभाजनभूत, प्रकृतिसौन्दर्यनिन्दितनन्दनवन, विदेशीयानामपि जनितविस्मेरतोद्गासुर काश्मीर! किं ते भविष्यम्?। यस्मिंश्च भगवती सरस्वती मूर्तिमती सततं सन्निदधे, यस्मिंश्च सरस्वत्यवतारतया प्रथिताः श्रीमम्मटप्रभृतयः शास्त्रग्रन्थप्रणयनपटवोऽवतेरुः, चिरमूषुः विद्वन्मूर्धान्दोलनक्षमाणि ग्रन्थरत्नानि रचयामासुः, यश्च भूमण्डलनन्दनवनमिति गीयते सर्वैः, यश्च भारतभुवः शिरस्स्थाने विराजति हन्त तमेवं काश्मीरदेशं भारतसर्वस्वायमानं काश्मीरदेशं पाकिस्तानीया यवना आत्मसात्कर्तुं वहोः कालादभिलषन्ति, प्रयतन्ते चाहर्निशम्। अझदसैन्यमिषेण समाक्रमन्तैव काश्मीरैकदेशम्। प्रबलेन सर्वराष्ट्रनियमनार्थमवतीर्णेन युक्तराष्ट्रसंघेन नियुक्तया सन्धानसमित्या निषिद्धोऽपि पाकिस्तानीयसर्वकारः पदात्पदमपि न परावर्तयति स्वसैन्यम्। न परित्यजति समाक्रान्तभागस्याणुप्रदेशमपि। एवंस्थितेऽपि स्वशासनोल्लङ्घिनं यवनसर्वकारमुपेक्षते सन्धानसमिति निष्पक्षपातमात्मानं मन्यमाना। साटोपमन्यायमार्गगामिनः कलहप्रियस्य पाकिस्तानस्य पुरतो हतप्रभेयं समितिरियतैव न विरमति प्रत्युत न्यायपथादनपेतं शान्तिप्रणयिनं कोमलस्वभावं च भारतसर्वकारं सूचयति स्वनिर्दिष्टसमयपरिपालनाय। अमेरिकाध्यक्षः आङ्ग्लप्रधानसचिवश्च पाकिस्तानीयकुकृत्यमनिषिध्यैव मध्यस्थसूचनानुमोदाय संदेशं प्रहिणुतः सन्धानप्रेप्सया। साधूच्यते सर्वव्यवहारवेदिभिः — 'मृदुर्हि परिभूयते' इति। आङ्ग्लपत्रिकालेखैः स्पष्टं ज्ञायते तत्सर्वकारमनीषा यद् काश्मीरदेशं विभज्य भारत–पाकिसर्वकारयोरर्धार्धप्रदानेन कलहः प्रशमनीय इति। आत्मनो रशियादेशेन सन्धानप्रदर्शनच्छलेन भयमुत्पाद्य स्वार्थसाधनमीहते पाकिसर्वकारः। परमेतावत्पर्यन्तमात्मनो मृदुस्वभावस्यान्यैः क्रियमाणं दुरुपयोगं दुष्परिणामं चान्वीक्ष्य असहमानः सुप्तोत्थितजागृततेजाः प्रधानमन्त्री श्रीजवाहरलालमहा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भागः प्रसङ्गे युद्धेनापि काश्मीररक्षणं प्रतिजानीते सावेशभरमिति प्रमोदन्ते सर्वे भारतीयाः, श्लाघन्ते च वीरप्रतिज्ञं प्रमुखामात्यवरम्। सेयं प्रतिज्ञा न केनापि कारणेन न कस्यापि निर्बन्धेन च शिथिलीभूयादिति वयमाशास्महे। अनादिकालतो भारतान्तर्गतं समग्रं काश्मीरप्रान्तं न कदापि विच्छेदमर्हति न वा परायत्तताम्। काश्मीररक्षणे एव भारतं सुरक्षितं स्यात्। न चेत् समाक्रान्ते काश्मीरभागे भिक्षुपादप्रसरणन्यायेन संपूर्णमेव भारतं पुनर्यवनैरायत्तीकृतं स्यात्, भारतरक्षणमसुकरं भवेत्, भारतस्य पुनरुद्धारोऽसंभनीयतयाऽऽपतेदिति देशप्रणयिनोऽभिप्रयन्ति विचारविचक्षणाः। अतोऽधुनैव पुरःपरापतिष्यमाणविपत्तिपरम्परापरिहाराय भारतसर्वकारेण चक्षुषि तैलं निक्षिप्य सदैव जागरूकेण सन्नद्धेन भाव्यम्। न कस्यापि दाक्षिण्येनात्मनः पादे शिलाप्रक्षेपणप्रसक्त्या पश्चात्तापप्रसङ्गायावकाशः कथमपि देयः पूर्वं भारतविच्छेदनसम्मतिप्रदानसमय इवेतीत्येव सर्वेषां देशाभिमानिनां बलवानभिलाषः।

पुरा शते शतप्रमाणेन हिन्दुजननिवासस्थानमपि काश्मीरप्रान्तमद्य हिन्दूनामनाक्रमणवृत्त्या संकुचितभावनारोगेण स्वत्वाभिमानवैकल्येन स्वार्थबुध्या संघटनावैमुख्येन सर्वत्रौदासीन्यदोषेण च यवनभूयिष्ठं दृश्यते इति महते विषादाय कल्पते।

भारते विदेशीयानां प्रवेशसमय एव यदि न्यरुन्त्स्यन् पारस्परिकविरोधं परिहाय भारतीया वीरक्षितीश्वराः, यदि च तेषां नादास्यन् निवासायावकाशं यदि वा नासहिष्यन् धर्मविरोधादिकं, यदि च कपटेन बलात्कारेण वा जातिभ्रंशितानामात्मबान्धवानां प्रायश्चित्तादिना स्वयूथे पुनर्ग्रहणायौदार्यमदर्शयिष्यन् तर्हि न तेषां सङ्ख्या वृद्धिमयास्यत्कथमपि। तदा समुदासभावादेव तस्येदं कर्मणः फलं कटुतममनुभूयते भारतीयैः। इदानीमपि जागृतैः स्वधर्मसूत्रमवलम्ब्यैव परस्परं संबद्धैर्भारतीयै संघटना विधीयेत, तर्ह्येव पुनरुत्थानाशा। न चेत् धर्मातीतपक्षाश्रपणे विधर्मान्धकूपपतनं पुनरनुत्थानं निश्चितमेवेति साधु समाकलनीयम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विमर्शास्थानम्

श्रीमध्वाचार्याः तेषां तत्त्वज्ञानं च— जगति महदेवोपकृतं पूर्वमवतीर्णैर्महात्मभिर्मतस्थापकैः। तैरुपदिष्टपथानुसरणमेव महते हिताय कल्पते। तैरुद्भावितमेव दिव्यतत्त्वज्ञानं जगति शान्तिं प्रास्थापयत्। जगति विविधविचारक्रान्त्या अज्ञजनबुद्धिभेदेन क्षोभावहा महत्येवाशान्तिः संजायते, प्राज्ञा अपि दिङ्मूढा भवन्ति, मूढा अपथमनुसरन्ति, तदैव जगदुद्धाराय महात्मानोऽवतरन्ति जगतः क्षेमाय। जगति त्रिकालाबाधितं श्रुति–स्मृति–पुराणसम्मतमेव तत्त्वज्ञानं प्रसार्य तेन विमलीकुर्वन्ति मानसं मानवानां कतकरजसेव सलिलम्। यदि मतस्थापका नावातरिष्यन्जगति, तर्हि पशुप्रायमभविष्यज्जगदिदम्। कदापि नोदनंस्यदात्मीयं शिरो भारतमिदम्। समग्रे वसुन्धरावलये सर्वैर्भारतस्य सर्वोच्चतया जेगीयते कीर्तिः, तस्य भारतीयानां दिव्यतत्त्वज्ञानं तन्मूलिका महोच्चा संस्कृतिश्चैव निदानम्। तत्त्वज्ञानं नाम शम–दमाद्यधिष्ठानत्वेन मनश्शान्तिजननद्वारा जगत्यां शान्तिप्रस्थापनक्षमं दिव्यं साधनम्। तदाश्रयणमन्तरा न कदापि शान्तिसंभवः। केचन प्राज्ञम्मन्यास्तत्त्वज्ञानं नाम व्यवहारपथातीतं प्रगतिप्रतिबन्धकं निरुद्योगताप्रसारकमिति जल्पन्ति विवेकवैकल्येन। इतरमतविषये वक्तुं नास्माकमधिकारः। परं श्रीमध्वाचार्यमतविषये विचार्यमाणे तेषां तत्त्वज्ञानं न व्यवहारपथातिगं, नापि प्रगतिविरोधि, नवाऽऽलस्योत्तेजकमिति सर्वैरवगम्यत एव। श्रीमध्वाचार्याणां तत्त्वज्ञानमिव तेषां चरितमपि विपत्सु कर्तव्योपदेशकं मार्गदर्शकं च। तदुभयं संस्कृतभाषानिबद्धं सामान्यजनैः संस्कृतानभिज्ञैरवगन्तुमशक्यम्। अतस्तस्य देशभाषासु प्रकाशनं विविधविचारजटिलेऽस्मिन्समये नितान्तमावश्यकम्। तदेतदालोच्यैवास्मत्प्रियसुहृद्भिरुभयभाषाविशारदैः "द्वैतसिद्धान्तकेसरी" पत्रसम्पादकैः श्रीअवधानीरामाचार्यमहोदयैर्निबद्धोऽयं ग्रन्थः महाराष्ट्रभाषया। ग्रन्थेऽस्मिन् श्रीमध्वाचार्याणां चरितं प्राचीनग्रन्थानुसारं सुगमया सरलया सरसया हृदयङ्गमया च भाषया सविवेचनमुपनिबद्धमेतैर्महाभागैः। तुलनात्मकदृष्ट्या इतर-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मतान्यपि विमर्शपथमुपनीतानि निष्पक्षपातम् । श्रीमदाचार्यकालनिर्णयोऽपि साधक-बाधक प्रमाणविचारपुरस्सरं सम्यगाकलितः । अन्ते आचार्यग्रन्थानां परिचयोऽपि दत्तः समासतः । अन्तरङ्गमिव बाह्यङ्गमपि सौष्ठवोपेतं सांचित्रं बलादेवाकर्षति पठितॄणां चेतांसि । एवं च ग्रन्थोऽयमवश्यं संग्राह्यः महाराष्ट्री-भाषाभिज्ञैर्भावुकैर्विशेषतो माध्वमतानुयायिभिः । ईदृशान्यग्रन्थनिर्माणकर्मणि व्यापृतानामेषां ग्रन्थकाराणां समुत्तेजनीय उद्यमः, संवर्धनीय उत्साहः सफलीकरणीयश्च परिश्रमः । अभिनन्दामस्तमां सानन्दं सश्लाघं च समये देशभाषायामितरश्लीलशृङ्गारकथानुवाचनविकृतचेतसां जनानां मोहपरिहारे-णामृतायमानं श्रीमदाचार्यचरितं देशभाषायां ग्रन्थात्मना निबद्धवतः ईदृशग्रन्थग्रन्थ-निर्माणे सदा सावधानानेतानवधानीमहाभागान् । आशास्महे चोत्तरोत्तरमीदृश-ग्रन्थरचनासंभवं यशः श्रेयश्च ।

प्राप्तिस्थानम्:— द्वैतसिधान्तकार्यालय
१८४ शनिवारपेठ पुणे २.

हरस्तुतिः— नाम्नैवास्य पुस्तकस्य विषयोऽवगम्यते । त्रिचत्वारिंश-त्सङ्ख्याकैः सरलैः पद्यैर्गुम्फितमिदं भगवति भवानीपतौ भक्तिभरभरितं स्तोत्रमिदं भाग्यपुरी (दक्षिणहैद्राबाद) वास्तव्यैः श्रीगरिकपाट्युपाह्व लक्ष्मी-कान्तमहाभागैर्विरचितं हरतिं पठितॄणां चेतांसि । अत्रत्या भाषाशैली सरला सुगमा सरसा च । व्याकरणाचार्यैः श्रीकम्मम्पाटि रागमूर्तिशास्त्रिभिर्यद्वर्णितम्— "शब्दसौष्ठवम्, अर्थगाम्भीर्यं, सहृदयहृदयाल्हादका ओजः प्रसादमाधुर्यादि-गुणा, उपमाद्यलङ्कारा, द्राक्षापाकः, अनुगुणा शय्या चेत्येवमादिगुणैः प्राचीना-चार्यरचनामनुसरती"ति तदवितथमेव मन्यामहे । भावुकैः सकृदपि वा पठनी-यमिदं पुस्तकम् ।

प्राप्तिस्थानं मूल्यं च नोल्लेखितमत्र ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वाचकेषु विज्ञप्तिः

मधुरवाण्याश्चतुर्दशवर्षस्य षष्ठोऽङ्कः मुद्रणालयस्यासौकर्यात् किञ्चिद्विलम्बेन प्रकाश्यते इदानीम्। अविलम्बाय प्रयत्नः प्रचलित एव सन्ततम्। मुद्रणालयस्यानायत्ततया जायमानो विलम्बः क्षाम्यत एव सदयैरुदारचैतस्कैर्वाचकमहोदयैरिति वाढं विश्वसिमः। नियतप्रकाशने धनमपि प्रधानसाधनमिति न खलु नाविदितं श्रीमताम्। नियतसमये धनाप्रदाने मधुरवाणीकृते मुद्रणालयस्य मुद्रणमेव संजायते। अत एव सविनयं प्रार्थितं गतङ्के सत्वरं वार्षिकमूल्यधनप्रेषणाय वाचकेषु। परं मधुरवाण्या दुर्दैवाद् द्वित्रान्विहाय न केनापि वाचकमहाभागेनेतो दृष्टिर्निक्षिप्ता। धनप्रेषणेन नानुगृहीता मधुरवाणी। वृथा धनहारिणी व्ही. पी. न समाश्रयणीयेति मनीषा नः। लेखलेखन-वर्णशोधन (प्रूफकरेक्शन्) इतरलेखनविवेचनादिकर्मण्येव नीयमानकालस्य अन्यस्योपजीवनोद्यममपि अवकाशाभावात्परित्यक्तवतः अकिञ्चनत्वे सुदामसहोदयस्य न केवलं व्ही. प्या करणेऽवकाशः अपितु पत्रोत्तरदानेऽसमये प्राचीनाङ्कप्रेषणे च। वाचकैर्दीयमानमितरपत्रापेक्षयाऽधिकतया भासमानं मूल्यं विरलवाचकतया मधुरवाण्या मुद्रणव्ययायापि न पर्याप्तं भवति। तदा तेन कुतः संपादकस्योपजीवनाशा। कुतस्तरां सहायकलाभः कुतस्तमां च सेवकादिव्यवस्था। तदेतत्सर्वं सदयेन चेतसा यदि विचार्य सत्वरं मूल्यप्रेषणे वाचका मनो दद्युः पापीयसीं व्ही. पी. मनपेक्ष्यैव धनादेशद्वारेण, तर्हि बहूपकृताः स्यामानावश्यककाल-धनव्यय-श्रमपरिहारेण। मधुरवाणी-मुद्रण-प्रकाशनकार्यमपि निरन्तरायं निरन्तरं च प्रचलेत्। त्रयोदशवर्षे दत्तमूल्येभ्यो न पुनरिदानीं मूल्यमपेक्ष्यते असत्यपि बृहत्कुटुम्बपोषणपर्याप्तपारम्परिकधनानुकूल्ये, अलाभेऽपि मुद्रणपर्याप्तधनस्य, अविद्यमानेऽपि श्रमविभागार्थं सहायकजने केवलं सुरवाणीप्रेम्णैवानवकाशतयोपजीवनसाधनानि परित्यज्य संपादक-लेखक-शोधक-पत्रप्रेषकाद्यनेकभूमिकाग्रहणेन मधुरवाणीप्रकाशनकार्यं निर्वर्त्यते कथमप्यगणितदेहायासमनाकलितप्रपञ्चचिन्ताभरम्। तदत्र सहजां त्रुटिं कालविलम्बं च क्षमेरन्नेव ज्ञातवस्तुस्थितयो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वाचकाः । यदि कोऽपि समर्थो मधुरवाण्याः सर्वं भारं वोढुं पुरस्सरेत्, तर्हि तस्मै सानन्दं समर्पयितुमभिलषामः । यावच्छक्यं साहाय्यदानेनाश्वासयामः । परं निष्प्रयोजनं सस्वार्थविघातं श्रमावहमीदृशकार्यमङ्गीकृत्य मन्दकोटिष्वात्मानं प्रक्षेप्तुं गण्यतामधिगन्तु चान्विच्छेत्क्षणमपि को वा सुधीः । सुरवाणीप्रचार-मुग्धेनैव शक्यमिदं कर्तुम् । न तादृशो महात्माऽन्विष्यापि लभ्यते ।

एवं निर्मायं सर्वा परिस्थितिरावेदिता वाचकमहाभागेषु । सहस्राधिकेषु ग्राहकेषु लब्धेषु सहायक–सेवकादिसौकर्येण नियतवेलं बृहदाकारेण मधुरवाणी वाचकानुरञ्जने क्षमा स्यात् । अतः संपन्नैर्ग्राहकैरधिकसधनदानेन सामान्यै-र्वार्षिकमूल्यप्रेषणेन ग्राहकसङ्ख्यासंवर्धनेन च मधुरवाणीपोषणद्वारा सुरवाणी-सेवासुकृतभाजो भवेयुरिति प्रार्थ्यते ।

विना मूल्यमादर्शसञ्चिकाप्रेषणाय लिखन्ति पत्राणि केचन । अपरे महाभागा व्ही. पी. प्रेषणाय निवेद्य सविधमुपागतां तां निस्सङ्कोचं परावर्त-यन्तो निष्कारणमुद्वेजयन्ति नः । अन्येच संपादकैरज्ञातया आंग्लानां लिप्या भाषया पत्राणि विलिख्य अप्राप्तोत्तरा विमनायन्ते । वङ्ग-महाराष्ट्र-हिन्दी—संस्कृतेषु कयापि भाषया लिप्या वा लेखने लब्धार्थाः स्युः ।

अयि वाचकवरेण्याः वस्तुस्थितेरादर्शः भवतां पुरस्तात्स्थापितः । यदत्र समुचितं तद्विधीयतामित्यावेद्य विरम्यते विज्ञेष्वधिकोक्तेरनावश्यकतया ।

संस्कृतप्रचारविषये
मद्रप्रान्तीयशिक्षण सचिवानामभिभाषणम्

सुसमृद्धा हि संस्कृतविद्या, तां विना अन्याः भाषाः ऽपूर्णा एव । इदानीं तद्विरोधः केवलमसूययाऽज्ञानेन च संभवति सर्वत्र । तत्संस्कृतप्रचारार्थं स्माभिः कापि योजना क्रियते । संस्कृताभिमानिभिः पण्डितैश्चास्याः महत्त्वविषये जनान् प्रत्याययितुं प्रयत्नः कर्तव्यः इति मद्रप्रान्तीयशिक्षणमन्त्रिवर्यैः श्रीमाधवमेननमहा-भागैरुक्तं कस्यांचन् सभायाम् । अयि गीर्माणवाणीप्रणयिनः इमां वार्तां श्रुत्वा कस्य वा संस्कृताभिमानिनः मनसि प्रमोदो न स्यात् । एवमेव तत्तत्प्रान्तीय शिक्षणमन्त्रिवरेण्यानां मनसि च सद्बुद्धिरियं प्रादुर्भवेत् तर्हि नूनं चास्माकं संस्कृतविद्यायाः प्रचारः समुद्धारश्च चिरादेव स्यादिति मन्यामहे ।

श्री सांगली राघवेन्द्राचार्यः (काव्यतीर्थः)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीभारतसुप्रभातम्

(पूर्वतोऽनुवृत्तम्)

निबन्धाः—'राजकविः' महामहोपाध्यायः के. एस्. कृष्णमूर्तिशास्त्री, मदुरा.

अष्टाङ्गपातं प्रणिपत्य भक्त्या
तुष्टाव वैकुण्ठमकुण्ठशक्तिम् ।
यत्पादपङ्केरुहचञ्चरीकां-
श्चतुर्मुखादीन्निगदन्ति देवान् ॥
दामोदराय सुरवैरिहराय हार-
केयूरमेदुरतराय सुरेश्वराय ।
नीलाभ्रसोदरशरीरमनोहराय
श्रीभूरमासहचराय नमो नमस्ते ॥

वत्स ! आयुष्मान्भव । अपि कुशलम् । कुत आगतवानसि । अद्भुतानेकविषयावगमनप्रयोजनं हि तवागमनं भवति । एहि कुञ्जभवनमेतदध्यास्य पवनसेवासुखं समनुभवामः ॥

प्रभो ! अदृश्यतामुपगतः प्रायशो भारतभूम्यामेव भ्राम्यामि । विनोदार्थमपीदं भ्रमणं विषादमुपजनयत्यन्ततः । सर्वलोकाधिनाथस्य पुरतो भारतभाग्यविपर्ययङ्कथङ्कथयिष्यामि । भारतधर्मभूमिः कथमवर्तत वर्तते वर्तिष्यत इति चिन्तयत एव मे महानुपजायते वेपथुः। देशान्तरेभ्य इव स्वर्गादिलोकान्तरेभ्योऽपि सस्यादिसमस्ततंपत्समृद्धा न केवलमदत्त मिष्टान्नपानवसनादिकमपि तु सुदुर्लभां ज्ञानविज्ञानसंपत्तिमर्पीति नैतदविदितं भवताम् ।

तथाहि—

गर्भस्थो वामदेवो मनुहरमभवं सूर्य इत्याचचक्षे
प्रह्लादाद्याः कुमारास्त्वयि भगवति ते भक्तिभाजो बभूवुः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

धर्मग्रन्थान्न्यवध्नन्मुनिकुलतिलका याज्ञवल्क्यादयोऽपि
व्यासप्राचेतसाद्या जगदुपकृतये काव्यरत्नान्यकार्षुः ॥

मन्विक्षाक्युधिष्ठिरप्रभृतयो राजर्षयो रेजिरे
क्रुद्धाः कौशिककुम्भसंभवमुखाश्शक्तेर्धुर्तिं तेनिरे ।
सैन्यैः श्रीरघुनायकस्य च भरद्वाजो द्विजस्त्वाश्रमे
धेन्वाः प्राभवतश्चकार मतिमानातिथ्यमत्यद्भुतम् ॥

पातिव्रत्यबलान्मृत्युञ्जित्वा याऽमुमुचत्पतिम् ।
सावित्री सा भारतोर्व्यास्तपसः फलमुत्तमम् ॥

वैकुण्ठतो गरिष्ठां तां सर्वसंपत्समुन्नताम् ।
भारतक्ष्मां भोक्तुकामो रामाद्यात्मा ह्यवातरः ॥

ज्ञानाचार्यस्थानलोभात्सोढ्वा ज्ञातितिरस्क्रियाम् ।
पार्थसारथिरूपेण गीताशास्त्रमुपादिशः ॥

पितृभक्तेरात्मभक्तिं दृढीकर्तुमिव प्रभो ! ।
गोब्राह्मणहितार्थाय प्रल्हादपितरं ह्यहन् ॥

पुरुहूतसमाहूतो हत्वा दैत्याननेकदा ।
अयूयुजद्दशरथस्सहस्राक्षं जयश्रिया ॥

भीष्मोऽपि धर्ममर्मज्ञो वसुरूपः परन्तपः ।
आजन्मब्रह्मचर्यं हि स्वीचकार पितुःकृते ॥

रावणान्तःपुरे दृष्ट्वा योषाश्शिथिलवाससः ।
न व्यकम्पत धर्मात्मा कपिः पवननन्दनः ॥

शिबिश्श्येनकृते मांसं, कर्णस्सूर्याय कुण्डलम् ।
दधीचिरस्थि पृष्टस्थं दत्वैते प्रथिता भुवि ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गुर्वर्थमर्थिने प्रादात्कौत्साय कनकं बहु ।
विश्वजिद्ब्रयितैश्वर्यो रघुर्जित्वा धनाधिपम् ॥

स्वशिरःकर्तनं कर्तुमन्वजानीत शङ्करः ।
कापालिकाय कस्मैचिद्भगवल्लोकशङ्करः ॥

आनृशंस्यं परित्यज्य जांह्मा व्याधोऽपि धर्मवित् ।
प्रवृद्धमातापितरौ पर्यत्रायत कीर्तिमान् ॥

किंबहुना !

भार्यामांसं न पर्याप्तं व्याधक्षुच्छान्तये परम् ।
इति मत्वा विवेशाग्निं कपोतोऽतिथिधर्मवित् ॥

कपिञ्जलाण्डजा ह्यात्मज्ञानं जैमिनये त्रयः ।
उपादिशन्देवतानां मूर्तिमत्वादिकं तथा ॥

द्यावापृथिव्योस्सन्धानं कर्तुमेव प्रजापतिः ।
यज्ञकामदुघा भूत्यै सृष्टवान्विष्णुरूपिणीः ॥

चातुर्वर्ण्यं त्वया सृष्टं गुणकर्मविभागशः ।
स्वधर्माचरणात्सौख्यं भेजे काममधोक्षज ! ।
धर्मार्थकाममोक्षाख्यं चतुर्भुज ! चतुर्विधम् ।
सूते भारतवर्षोऽयं फलं कल्पद्रुमोपमः ॥

वत्स ! देवमुने ! भर्त्रा साकं प्रसादभित्तौ वृत्तचरित्रचित्रसन्दर्शनावसरे, जनकनन्दिन्या वदनसारसान्निस्सारयति सरस्वतीं, सरसामपि दीर्घसमासनिबिरीसां ख्यातिमानुत्तररामचरिते भवभूतिः। बाणभट्टवागधिष्ठानदेवताविष्टेव चष्टे मैथिली॥

"विश्वंभरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते"

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इति कथनेन व्यञ्जयतीव च कविः कञ्चिदर्थमश्लीलम् ।

वस्तुस्थितिकीर्तनव्याजेन "यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जन" इत्यमर्षभरमात्मीयमाविष्करोति ।

श्रीरामावतारे भवभूतिकृतोऽयमुपकारस्सहृदयानाम् । नवरसनिरूपण-निपुणे मधुमयभणित्येकशरणे समग्रकाव्यलक्षणे श्रीमद्रामायणेऽपि, हन्त ! ऊनषोडशादिपदं प्रयुञ्जानोऽश्लीलं महर्षिर्वाल्मीकिः किन्न दुष्यति ।? इति चोदयितुमपि नैव पृष्ठतो भवेयुः कतिचन विपश्चितः । हन्त! कविर्भवभूति-रञ्चितमवोचत "यथा स्त्रीणामित्यादिना ।

कालिदासो हि दृश्यकाव्यकलनाभिधानायां कविरलं कुशलश्चित्रकलायाम् । शकुन्तलामुखकमलान्मन्दं मन्दं सुन्दरं स्यन्दमानैरिव मरन्दबिन्दुभिस्स्निग्धमुग्धैरेव मुदुलैः पदैश्श्रवणद्वारेण सहृदयहृदयारविन्दं सानन्दमुल्लासयति ॥ 'नानृषिः कुरुते काव्यमि' ति सत्यापयति सूक्तिमपि । आलङ्कारिकाणां पुनरत्रापि बहुधा दोषदर्शनमपीति चित्रमेतत् ।

असमस्तैः पदैश्शुद्धैर्लोभनीयैस्सुमैरिव ।
रसभावपरैस्स्त्रीणां व्याहारो हि मनोहरः ॥

अधुनैवेयं भार्गवी भवभूतिसीतावाग्धोरणीमसाधारणीमाश्रित्य विस्तर-मुपन्यास्यत् । दिष्ट्या वृष्टिरेषा कथञ्चिदुपशशाम । सन्दर्भेऽस्मिंस्त्वमपि समायातः । प्रारब्धवांश्च महापुराणम् ।

अपेक्षिताभिधानं हि पण्डितेभ्यो न रोचते ।
जगत्सृष्टिं प्रारभेरन्वक्तुं गृहपरिस्थिति ॥

अत एव हि लौकिकैर्धीमद्भिर्विडम्ब्यन्ते पण्डिताः । त्याज्योऽयं महा-न्दोषस्सर्वात्मना पण्डितसमुदायसमुन्नीतिनिरोधकः ।

किञ्च, सन्दर्भज्ञानविधुरास्सर्वेऽपि मामेवोपसृप्य स्वार्थमीहन्ते साध-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पितुम् । न त्वां वदामि किन्तु देवानिन्द्रादीन् । दुष्परिहर एव भवत्यय मुपद्रवः । एकोऽपि मक्षिको नोपसर्पति कैलासवासिनं भगवन्तमुमाकान्तम् । ममापि तस्यैव मन्ये, भवेदुचितं पारिव्राज्यमिति । वत्स ! वस्तुस्थितिमकथयं मा व्यथां गाः । सर्वथा त्वया सङ्क्लेशव्यं विषयजातमित्यत्रैव तात्पर्यम् ।

भगवन्नच्युत ! धर्मप्रभो ! लोकक्षेम एव मे महल्लक्ष्यम् । नात्र स्वार्थः कोऽपि । वक्ष्यमाणं क्षाम्यन्तु भवन्तः । समयमियन्तं यः कृतः प्रसङ्गः श्रीमद्भिस्ततोऽपि शतगुणं सङ्क्लिष्ट एव भविष्यत्युपन्यासो मामकः । अहमभ्यमन्ये, भारतभूम्यामेव श्रीमदान्धेभ्यः परिभवः पण्डितप्रकाण्डानामिति । सर्वत्र सर्वदा सर्वं भवतीत्यधुनैव निरधारयम् । अपनीयतां मन्युः । प्रसीदतु भवान् अनुजानातु च, यथागतं गमिष्यामि । समुचितसमयोपनिपाते यावत्पश्यामि ॥

नारद ! एतावदभिवानमपेक्ष्य, विषयेऽवतरणमेव भवति लघुतरमिति कुतो नावगच्छसि । तव सन्दर्भानुगुणभणितिनिपुणिमानमनुभवितुमेव, लौकिकधनिकवदित्थमभ्यनैषम् । निगृह्य हृदयव्यथां ब्रूहि । श्रोष्यामि सर्वं सावधानम् । यतस्त्वमसि प्रियतमो, मान्यश्च ।

भगवन् ! सुप्रभातमेतदवैमि । यतो महता परिश्रमेण प्रसादितः परमात्मा । अस्यां शताब्द्यां हन्त ! प्रायशस्सर्वेऽपि भवन्त्यविद्योपासकास्सुरापानलोलुपा गोघ्नाश्शृगालवृत्तयस्सङ्कीर्णाचारा धर्मद्रोहपरा रभसकारिणो मिथ्याभागवताश्च संवृत्ता भारतभूमीसुराः ॥ आगन्तुकदेवता ग्रामदेवतामिवाङ्गलकलेयमविकलमाधिपत्यं निर्वहन्ती व्यद्रावयत्सुदूरतः श्रुतिमहितां महतीं सुरभारतीम् । यामाह भवदभिमततमः कालिदासः "संस्कारवत्येव गिरा मनीषीत्या" दिना प्रशस्तां, तस्या एतस्या सुरभारत्याश्शृणुत दुरवस्थाम् अष्टाचत्वारिंशत्संस्कारैस्संस्कृतानां वाणीयं स्वयं संस्कृता च सती विजयते । भारतस्यास्याधारणद्रविणायमानतयैव भारतीति व्यपदेशोऽपि । स्वोपासकेभ्यो, व्यपोह्य मर्त्यभावं स्वतादात्म्यापादनेन वितरत्यमर्त्यतामपि । श्रुतिस्मृतीतिहास-पुराणोप-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पुराणादीनि सर्वाण्यपि चकासतितमामेतदेकशरीराणि । कल्पवल्लरीवाभीप्सित समस्तफलवितरणप्रवणियमकरुणमकारणञ्च व्यवहारपथान्निष्कासिता श्वपाक-जातिरिव ॥

हिन्दीद्राविडकन्नडोद्रतुलुवत्रैलिङ्गभाषास्सदाः
स्पर्धन्तेऽमरभारतीदुहितरो मात्रा भृशं दुर्बलाः ।
नोपेक्ष्यो विषयोऽयमल्प इति, यत्क्षुद्राः क्षिते रेणवः
संभूयातिबलेन* खे पिदधते तिग्मांशुरोचिश्छटाम् ॥

वीणाविनोदरासिक ! शृणु —

सर्वमप्यवगम्यते पारम्यं भगवत्यास्सुरभारत्याः । व्यवहारेऽभावमात्रेण, मृतभाषात्वेन व्यपदेशमपि दुस्सहं जानीमहे। चतुर्णां मध्ये द्वावेव मध्यमौ पुरुषार्थाविति दुरभिसन्दधते जनाः । सर्वात्मनास्माकं धर्मदाराणां फलमेतदिति ब्रूमहे बाढम् । धर्ममोक्षस्वरूपाधिगमे पशुप्रायाणामनधिकारः केवलं न, किन्तु तद्विषयाग्रहाभावोऽपि । एवञ्च कृत्स्नोऽपि लोकव्यवहारः परिसमाप्यते केवल-मर्थकामयोः । धर्मोपेक्षणफलमपि परमदुर्भिक्षयोगरूपं भारतीयाः काममनु-भवन्त्येव । तथापि नैव प्रतिपद्यन्ते, व्याघ्रप्रायाणामन्योन्यसंग्रहारपुरस्सरं जीवयात्रां निर्वर्तयितुमुद्युक्तानां पाश्चात्यानामनुकरणं वेषभाषाचारादिभिर्युक्तमिति भ्रान्त्योत्पश्यन्तो भारतविषयवासिनः । धर्मस्य तत्प्रतिपादकस्य च संस्कृतस्य च द्वेषं काममभिवर्धयन्तामिमे । तावता न तयोः कापि क्षतिः ॥

यस्सूर्यन्नो नमस्कुर्यादारोग्यं नाप्नुयाच्च सः ।
तावता किन्नु भगवान्पूषा भवति दोषभाक् ॥

केवलमर्थकामाविषयको लोकव्यवहारो निर्वर्त्यता यया कयाचन-

(* अतिबलेन = वायुना निमित्ते तृतीया)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भाषया । कः पुनरनुन्मत्तो भित्तावयश्शङ्कुं निखायाचित्रफलकं लम्बयितुकामस्सालग्रामेण । को वा सौवर्णं पात्रमुपयुञ्जीत पवित्रतरपित्र्यदैव्यकर्मव्यतिरेकेण शरीरशौचकृत्याय । न केवलं भाषा मृता किन्तु तत्प्रतिपाद्यो धर्मः, वेदवेद्या वयं सर्वेऽपि । धिक्कलिबलकोलाहलम् । व्यवहारपथातिवर्तमानत्वमेव हि प्राशस्त्येऽस्मदादीनां भवति हेतुः । एवं सति कथमेतावता मृतताम्राचक्षत इमे नूननबृहस्पतयोऽमरभाषाया इति विस्मयामहे । लोकेऽपि "अपि जामाता ते भावी चक्षुर्घ्राणादिष्वविकलः" इत्येव पृच्छन्ति, न तु स किमुच्छ्वासनिश्वासौ करोतीति । एवञ्च सर्वव्यवहाराधारस्य, प्राणस्य व्यवहारविषयता नेति कृत्वा, तस्यापि मृतत्वमिमे कथयेयुरित्र । इत्थं मृतत्वं ख्यापयन्त एव मृता इति युक्तं वक्तुम् ।

संस्कृतानादरभरविरेचनाय स एव भवति कालो, यो धर्माभ्युन्नतयेऽत्र कल्पेत । सोऽपि भविष्यत्येवेति विश्वसिमः ।

किञ्चान्तरेण शास्त्रविरोधं, यदि स्त्रीशूद्रादयोऽपि संस्कृतमेतदध्याप्येरंस्तदा भवेदीदृशावस्थाया ह्रासः । ब्राह्मणेषु गौरवबुद्ध्युदयेन, द्वेषोऽपि क्रमाद्ब्राह्मणानां स्यात्तिरोहितः ।

परन्तु विद्वांसोऽत्र नैव श्रद्दधति । वत्स ! पश्य पाश्चात्यानामत्रन्यमुद्यमं स्वमतभाषयोः प्रचारणे । अपि नाम कश्चिद्धनिकः पुरो भवति धर्मव्यवस्थापने संस्कृतपरित्राणकर्माणि वा ! ऐकमत्यन्तु गगनकुसुमायमानमेवं भारतवासिनां विशिष्य विप्राणाम् ।

संख्यायामत्यन्तमल्पीयांसोऽपि महंमदीयाः काममैकमत्येन समुद्युञ्जते । मतपरित्राणमिषेण किञ्चिन्नाकुर्वत समीपकाले । राजाधिकारोऽपि दूरेतरां वर्तते विनिग्रहे । सर्वमेतदैकमत्यपुरस्सरसमुद्यमस्यैव फलम् । यावानुद्योगस्तावानुच्छ्रायः । नीरानुसारी हि सारसदलानां द्राघिमा भवति । यद्यपि तत्र तत्र प्रचलन्ति परिषदो ब्राह्मणानामभ्युन्नतय इति विद्म एव वयं, तथापि नामास्कं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

परितोषः। यत एतास्सर्वा अपि परिषदो हन्त! श्राम्यन्ति केवलमैहिक-जीवनोपयोगिद्रव्यमात्रलक्ष्याः, न निरर्थतरधर्मत्राणबद्धश्रद्धाः।

यद्यप्यहं गोप्ता धर्माणां, तथापि, कालप्रतीक्षणं भवत्यावश्यकं ममापि।

जगन्नाथ! इतरेतराश्रयमेतत्कार्यं न प्रकल्पेतेति भाति। धर्मोन्नतौ संस्कृतोन्नतिरेतदुन्नतौ धर्मोन्नतिरिति।

वत्स! मास्तु ते श्रमः परस्पराश्रयरूपदोषपरिहारे अभ्युपायमहमेव कथयिष्यामि। उदीरयोपरि—

भगवन्न केवलमविद्योपासकाः। किन्तु सुरापायिनोऽपि। गवां हि क्षीरमुपयुज्यते शरीरपरिपोषार्थमाबालवृद्धम्। कामं हुत्वाप्यत्राशिष्यत भूयस्तरां गोधनानां द्विजानाम्। न्यपीयत च यथेच्छम्॥ सारवत्तरक्षीरादिप्राशेन पुरुषायुषजीविनस्त्रयमयजन्त च देवान्पूर्वे भूदेवाः। प्रीणिता गीर्वाणा वृष्टिद्वारा वसुमतीमन्वर्थाञ्चक्रुः। अनया प्रणाल्या प्रीणितमभूदुभयं भुवनम्। एवमुभयलोकप्रीणनप्रवणां हन्त! घ्नन्त्येवेति सांप्रतं वक्तुम्। मूलद्रव्यं क्षीरमेव प्रदूष्यते टिकाषन्नामकेन केनापि विषसार्वभौमेन। यत्काफीनाम्ना व्यपदिश्यते। कतिपये धनिकाः ओवल्टिन्नामकेन कुक्कुटाण्डप्रकृतिकेन दुग्धं संमिश्रय पातुं प्रभवन्ति। अत्र वर्तमानमनन्तं प्रभेदं भवाननन्तोऽपि न जानीते। टिकाषन्विषे प्रक्षिप्यमाणो मांसखण्डः कतिपयघण्टिकास्त्वेव द्रवीभूय भजते तद्रूपतामिति पाश्चात्य एव कश्चिद्विषग्वरः प्राह स्वयं परीक्ष्य। सत्येवं, मांसाशिनी राक्षसीयं काफी कथङ्कारमवकल्पेत शरीरपरिपोषायेति वदत। एतद्विक्रयाय प्रतिग्रामनगरं कोणे कोणे नैकान्यापणानि। यत्र ब्राह्मणा अहीणास्त्वयमुपविश्य साकं म्लेच्छैरीहन्ते पातुम्। कर्तारः कारयितारश्च श्राद्धादेर्नियतमनुपसेव्यैतां व्याप्रियेरन्न कर्मसु॥ लोकाय समग्राय, काफ्याः कृते न पर्याप्तं भवति प्रकृतिभूतं गवां दुग्धम्। एवमाहारोपयोगिनोऽत्यन्तमभावे दधिघृतादेः, यजनादिषु का कथा?। नास्तिकताङ्गतानां कथमनिमिषाणामनु-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ग्रहः। कथं वा चित्तशुद्धिः स्यादाहारानुसारिणी हि चेतश्शुद्धिः। हन्त! प्रायस्सर्वेऽपि काफ्रीपायिनो मूत्ररोगभाजः पितृपतिसदनमकाल एव प्रतियान्तीति, न काप्यनुपपत्तिर्दृष्टेऽर्थेऽस्मिन्। भिषगर्थे वा कियान्वृथा व्ययः? सर्वमेतद्विमृश्याधुनिकसरकाराधिकारिणो यदि निरुन्धीरन्नेतत्पानं भवेयुर्विवेकिनो भुवः क्षेमङ्कराश्च। एतद्विहाय व्यापकस्य कतिपयमात्राश्रयेण मधुपानस्य निरोधे नक्तंदिवं प्रयतन्ते। एतावता, वयं प्रतिषेधामो मधुपान निरोधव्यवसायमिति नैव मन्तव्यं, किन्तु तत्रेवात्रापि कर्तव्यं प्रयतनमित्येव ब्रूमः। कालक्रमेण बुद्धिमन्तोऽमात्याः, पिशाचीमेनां स्वदेशं प्रति [Europe] निष्कासयेयुरिति विश्वसिमि॥

इदानीन्तु महती क्षामोत्पत्तिर्व्यथयति भारतप्रसवित्रीम्। सर्वधर्मकार्यैकसाधनत्वाद्धि देवकामदुघायमाना गौस्स्तूयते समधिकं हिन्दुग्रन्थेषु। देवताविशेषमाराधिताः परिपोष्यन्ते च शिष्टैः। इत्थंप्रभावा लक्ष्मीयमाणा गावो हन्यन्त एवेति वदामि। यो यदफलं करोति स तद्धन्तीत्येवोच्यते॥ यथा मोक्षायात्मविचारणामकुर्वाण आत्महा भवतीति॥

अत्रामुत्र च क्षीरं सर्वात्मना हालाहलं कुर्वन्तः किन्न गोगोघ्नास्स्युः। एतदपेक्ष्य हीयते किं कृत्यं म्लेच्छानामिति पृच्छामि। आस्तामेष विस्तरः।

वञ्चनामार्गेणैव प्रायस्सर्वेऽपि कुर्वते धनार्जनम्। न वर्त्मना धर्म्येण किंबहुना, न्याय्येन पथा नैव सङ्गृह्णीत द्रविणम्। समीपकालसमुद्भूतसङ्ग्रामकारणेन, कति न प्रादुरभूवन्नूतनाः प्रभवः। प्राग्युद्धादेते हि दारिद्र्यमहाद्रिशृङ्गाग्रविहाररसिकास्समुद्रलङ्घिनिति को वा न वेद। भागवतेऽप्युक्तम्—

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

"अट्टशूला जनपदाश्शिवशूला द्विजातयः।
कामिन्यः केशशूलिन्यो भवन्ति हि कलौ युगे" इति

अद्यतु, प्रायस्सर्वेऽप्यन्नविक्रयिणो ब्राह्मणाः। एते च प्रत्यहं सहस्र-ब्राह्मणभोजनकर्तृनात्मनः पुण्यात्मनोऽभिमन्यन्ते। तथाप्येतेषु कतिपये धर्मार्थमपि किञ्चिद्ददतीति प्रमोदोऽस्मादृशाम्।

नारद! अनिच्छतोऽपि तव मुखादयमेको गुणांश उपागत इति सन्तुष्यामः।

प्रभो! अन्तरेण संस्कृतपण्डितं, सर्वेऽपि भिन्नाभिन्नवर्त्मस्ववतरान्ति द्रविणसङ्ग्रहणाय।

वत्स! कस्तव मत्सरः!। ज्ञानाभिवृद्धये परमधीयतां सर्वे। काममत्र-तरन्तु जीवयात्रानिर्वाहाय पथि सर्वस्मिन्देशकालानुसारेण। को हस्तं गृहीत्वा प्रतिषेधति माभूदिति। उपर्युपरि—

प्रभो! आपद्धर्म इति कथयन्तः सर्वे सर्वेषां कुर्वते कर्माणि।

वत्स! कालेऽस्मिन्नातीवेदं दुष्यति। ब्रूहि परम्—

प्रभो! रभसकारिणस्सर्वेऽपि संवृत्ताः। सर्वत्र संभ्रमं प्रदर्शयन्ति। भूमौ त्वरया जलं प्रक्षिपन्तस्सन्ध्याकरणमिषेण, प्रायस्सर्वे समनन्तरं तूष्णी मेवोपविशन्त आसते।

किमर्थमियदालस्यम्। तावत्यास्सर्वकार्येषु त्वराया न किमप्युत्पश्यामः प्रयोजनम्। कतिपये मोटार्नाम्ना यानेन, प्रतोल्यां बिहरत इतस्ततो वा चरतः पृथुकान्मनागप्यगणयन्तः वृथा सरभसं भ्राम्यन्ति। कियान्मदः!। कियान्वा सर्वजनद्रविणसमीकरणार्हायां रथ्यायां स्वत्वाभिमानः। अपरे द्वोयानेन डयन्तेऽण्डजा इव।

नारद! वृथाटनं तेषामिति केन निरणैषीः प्रमाणेन। अन्ततो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विनोदः फलं स्यादिति कुतो नावगतम् ? । उपरि—

भगवन्नेतेषामभावेऽपि, पूर्वैस्सर्वाण्यपि वैदिक—लौकिककर्माणि निर्वर्तितान्येव । प्राचीनैरसाधितानि कान्येभिर्जन्तुभिस्त्वरया साध्यन्ते ! ।

वत्स ! बालिशभाषितमेतत् । तदा न किमपि सौकर्यमभवत् । सौकर्यस्य महतोऽद्य सत्त्वे, को नामानुन्मत्तः स्वयमुपेक्षेत ।

ततस्ततः—

जनार्दन ! अधुनातनविश्वविद्यालयाः किं महत्फलं साधयितुमीशते । मुद्रणयन्त्राद्यभावकालेऽपि, कति ज्ञानसंपन्नान्यबध्नन्कोटिशो ग्रन्थरत्नानि । पर्णकुटीरेणैकेन साधितेष्वेकदेशमपि साधयितुमनीशाना एव सहस्रशो दृश्यमाना विद्यालया इति प्रत्येमि । अपि चात्मसंस्कारानुपयोगिनीत्वात्तस्या अर्थकाममात्रप्रयोजनाया विद्यात्वमेव भवति दुरुपपादम् ।

नारदमुने ! सङ्कुचिततमं भवति ते लक्ष्यम् । यत एवं ब्रवीषि । भवतु । पश्य तव मणिबन्धघटिकारं* कियती घण्टेति । यतोऽहमपीत्थैव काफीं सहागतवान्भार्गव्याऽऽरामरामणीयकसन्दर्शनाय । अरुणोदयात्प्रागेव काफी सज्जीकर्तव्येति पौनःपुन्येनाज्ञप्तोऽपि न तरां शृणोति सूदहतकः । किं करवाम । न कोऽप्यपरोऽन्विष्यापि लभ्यते । उद्योगस्यास्य तावान्महिमा । प्रार्थयामि त्वां, शिरोवेदना (काफ्या विरहात्) महतीत्थं वाचयति मां, हन्त ! म्लाना कमलापि । संह्रियतां सर्वम् । माभिवर्धयतु तवोषन्यासः पुनश्शिरोव्यथाम् ।

यदाज्ञापयन्ति भवन्तः—

श्राद्धं पित्र्यमहो ! त्यजन्ति बहवो, देवान्यजन्ते न च
क्षुद्रं देवमुपासते बहुविधं विप्रा दुराशाहताः ।
श्रीमन्तोऽपि दरिद्रवद्गृहगतान्सत्कुर्वते नातिथीन्

* Wrist watch

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वत्स ! शान्तं पापं प्रतिहतममङ्गलं, भारतभुवि भ्रमणेन समीचीनं संपादितवानसि ज्ञानम् । धार्मिकाः प्रभवो बहवस्सन्ति, ये तत्र दृष्टिविषयतां नोपागताः । ब्रूहि ब्रूहि–

बन्धुभ्योऽप्युपकुर्वते न कृपणा, नापि स्वयं भुञ्जते ।
नारद ! ये मया दृष्टा इति करणीयं शेषपूरणम् । अस्तु, ततः
गायन्ति प्रहसन्ति चाटु कथयन्त्याश्लिष्य हृष्यन्ति च
क्रीडन्ति प्ररुदन्ति जक्षति परिभ्राम्यन्ति नृत्यन्ति च ।
स्त्रीपुंसव्यतिरेकदृष्टिविकलाः साक्षादिव त्वां पुरो
वीक्ष्य, त्वद्भजनच्छलेन बहवः पद्मालयालम्बनात् ॥

मुने ! ब्रह्मपुत्र ! कस्ते भारः, श्रमो वा । कोऽयमीर्षाभरस्तवापि नवविधभक्तिसाम्राज्यधुरन्धरत्वेन प्रसिद्धिमुपगतवतः परामिति विस्मयं परमावहामि । तूर्णं संहर वाग्व्यापारम् ।

धर्मप्रभो !

यजनस्यैव विरहे संभवेद्याजनं कथम् ।
दान–प्रतिग्रहौ न स्तश्शास्त्रवर्त्मानुसारतः ॥
वन्ध्यमध्ययनञ्चेत्स्यादध्यापनकथा कुतः ।
वर्णाश्रमोचिता धर्मा नाममात्रावशेषिताः ॥
वेदास्समे वीतमोदाः स्मृतयो विस्मृतिङ्गताः ।
सहसा इतिहासाद्याः शिष्टाः कथं दशां गताः ॥
सौभ्रात्रमभ्रकुसुमं, सुलभः प्रलोभः
सौजन्यजन्यसुखमस्तमितं समेषाम् ।
भूतेषु माधव ! दया हृदयादयासी—
दासीदसीमविपदेष मनुष्यलोकः ॥
अतः परं मे भगवान्प्रमाणं धर्मरक्षकः ।
सुप्रभातं भारतस्य व्यवस्थापयितुं हरे ! ॥ (क्रमशः)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

"शकुन्तला पतिगृहं याति"

लेखिकाः - कुमारी अनामिका

"काव्येषु नाटकं रम्यं नाटकेषु शकुन्तला। तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम्"। इति सुप्रसिद्धश्लोकः यदा यदा लोचनगोचरतां याति श्रवणसरणिं वा उपगच्छति, तदा तदा तन्नाटकदिदृक्षा तच्छ्लोकचतुष्टयस्य शुश्रूषा च बलवती भवति स्म। तया एव आशया शाकुन्तलपुस्तकं मया उद्घाटितं दृष्टं च। परन्तु तदर्थ एव न मया ज्ञातः। तस्मात् अहं निराशा एव आसम्। ततः अस्माकम् आङ्ग्लविद्यालये षष्ठीं कक्ष्याम् उत्तीर्य सप्तम्यां कक्ष्यायाम् अहं प्रविष्टा। तदा तत्र नियोजितः संस्कृतपठ्यपुस्तके "शकुंतला पतिगृहं याति" इति शीर्षकं कमपि एकं पाठमवलोक्य अहम् अतीव आनन्देन उल्लासेन उत्साहेन संभ्रमेण च अनृत्यम्। सः पाठः शाकुंतलस्य चतुर्थाङ्कगतः इति तु ज्ञात्वा मम संतोषः सीमोल्लङ्घनमेव चकार। अद्य वा श्वो वा अहमपि शाकुन्तलस्य तत्रापि बहुभिः प्रशंसितस्य चतुर्थाङ्कस्य अर्थं स्वारस्यं सौन्दर्यं च अनुभवामि इत्येव मे आनन्दस्य हेतुः। यदा विश्रामदिनानन्तरं शाला प्रारब्धा, तद्दिने संस्कृतशिक्षणसमयमेव (संस्कृत पीरियड्) चातकपक्षिवत् प्रतीक्षमाणाऽऽसम्। इतरविषयास्तु तत्तदध्यापकेभ्यः प्रथमदिनत्वात् नवीनोत्साहेन शिक्षिताः। परं तु मम मनः शकुन्तला पतिगृहं प्रेषयितुमुत्कण्ठितमासीत्। आगतः संस्कृतावसरः। संस्कृतविद्याविशारदाः शास्त्रिणः आगत्य स्वासनम् अलञ्चक्रुः। पठ्यपुस्तकं हस्ते गृहीत्वा समन्दहासं छात्रान् अपृच्छन्- "कः पाठः प्रथमतः प्रारम्भणीय" इति। तदा सर्वप्रथममहमेव उत्थाय "शकुन्तला पतिगृहं याति" इति पाठः प्रथमं कथ्यतामिति सधैर्यमवदम्। तदा तेऽपि मन्दं हसन्तः "किं त्वमपि सेव पतिगृहं गन्तुमिच्छसि" इति विनोदं कर्तुम् अवदन्। तदा सर्वेऽपि सहाध्यायिनः सहाध्यायिन्यश्च उच्चैः अहसन्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तदा लज्जया मम मुखमेव नतं मुद्रितं चारक्तं चञ्चलदृगञ्चलं चाभूत्। अवमानिता भूत्वा स्वस्थाने स्वस्थम् उपाविशम्। तदाध्यापकाः मम लज्जारक्ते भ्रुमिकीलिते कातरे च लोचने, नतं मस्तकं विवर्णं मुखं च दृष्ट्वा तात्कालिकीं मम मनस्स्थितिम् अनुमाय संजातदयोदयाः प्रथमतः तमेव पाठमगृण्हन् अध्यापनाय। तदाऽहम् एकचित्ततया तं पाठं समग्रमाकर्ण्य अभ्यस्य मुखोद्गतमेव अकरवम्। एवं तदा श्रवण–मनन–निदिध्यासनादिभिः मम तत्र कोपि अपूर्वः रससाक्षात्कार एव अभूत्। तत्र प्राथमिक एव श्लोको मम अतीव मनोहरः प्रत्यभात्। वृक्षान् संबोध्य शकुन्तलापतिगृहप्रयाणार्थं अनुज्ञामापृच्छमानं काश्यपं निरीक्ष्य केचिदरसिका बालकाः उच्चैर्जहसुः। तदाऽध्यापकैः "अरसिकेषु कवित्वनिवेदनं, शिरसि मा लिख मा लिख मा लिख" इति वचनमुदाहृत्य मार्मिकम् उत्तरं प्रदत्तम्। तेन तेषाम् अभद्राणि मुखछिद्राणि मुद्रितानि अभूवन्। मम तु कश्यपमुनेः तरुलतादिषु आत्मीयभावनाम् आदरविशेषं च दृष्ट्वा तस्मिन् महती गौरवबुद्धिः उदिता। शकुन्तलाया अपि कियत्प्रेम जडेषु तरुलतादिषु। इदानीन्तनासु कन्यासु कियत्यो वा स्वसहोदरीष्वपि ईदृशं प्रेम कर्तुं सिद्धा भवन्ति ?। शकुन्तला लतासु विकसितमपि कुसुमं न स्वयं धरति स्मेत्यहो प्रेम्णः परा काष्ठा। प्रथमकुसुमप्रसूतिसमेय तस्या महानुत्सवः भवति स्मेत्यनेन वृक्षवल्लीसंसारे शकुन्तला कियदासक्तासीत् इति व्यज्यते। तस्या अन्य उद्योग एव नासीत्। केवलं वृक्षाणां नीरसेचनं पालनं पोषणं लालनमेव। शकुन्तला विवाहात् प्रागेव मातृधुरं स्वयं ससंतोषं स्वीकृत्य वृक्षलतादीनां पालिनी अभवत्। सामान्यतः लोके माता यत् यत् करोति स्वपुत्रेभ्यः, शकुन्तला तत् तत् सर्वमपि वृक्षलतानां कृते करोति स्म। तत्रापि च लतासु अतीव स्नेहः महती च प्रीतिः शकुन्तलायाः। अत एव नवमालिकालताया अतीव हृदयङ्गमं श्रवणसुभगं मधुरतरोच्चारणम् "वनजोत्स्ना इति नामकरणं कृतम्। तच्छ्रवणक्षणे एव सहृदयेन ज्ञायते शकुन्तला कियद्रसिका अनुरूपोचिताभिधाननिर्वाचने

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कियत्कुशला चासीदिति । सा वनज्योत्स्ना नाम बहिश्चरप्राणा एव शकुन्तलायाः । अत एव प्रथमाङ्के "तदेनां विस्मृतवत्यसीति" सख्या उक्ते तदाऽऽत्मानमपि विस्मरिष्यामि" इति स्वात्मतादात्म्यमेव तत्राभ्युपैति । कश्यपोऽपि वदति "अवैमि ते तस्यां सोदर्यास्नेहमिति" । शकुन्तलाया जङतरुवृक्षसामाजिकतायां तदीयसाजात्यसौन्दर्यादिकं मात्रयापि हीनताबुद्धिं नोत्पादयति । प्रत्युत अभिमानेनैव वदति "लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये" इति । पतिगृहप्रयाणसमये प्रियसख्योः प्रियंवदानुसूययोरालिङ्गनात् प्राक् वनज्योत्स्नाया एव आलिङ्गनं प्रथमतः काम्यते । सैव च सस्नेहं सदुःखमालिङ्ग्यते सप्रेमभरं चामन्त्र्यते । तदा तस्या वनज्योत्स्नाविषयकः प्रेमातिरेक इयद्भूमिं गतः दृश्यते यदालोक्य तस्या अभिन्नहृदययोः सख्योः प्रियंवदानुसूययोरपि मनसि असूया उत्पन्ना । अत एव "हला इयम् युवयोर्हस्ते निक्षेप" इतिवदन्त्या शकुन्तलायां तत्क्षण एव उभे अपि सहसा "अयं जनः कस्य हस्ते समर्पितः" इति स्वविषयकचिन्ताभावम् सूचयतः । लतावियोगकातरा तद्योगक्षेमविचारण—भाविव्यवस्थादिव्यग्रा शकुन्तला "परिष्वजस्व मां सखीजनं" चेति कश्यपसूचनां यावत् सखीजनालिङ्गनाय स्वयं नोपसर्पति । तस्या लताभगिनीप्रेमभरापूरिते हृदये अन्यप्रेमसौहार्दानामवकाश एव न । आबाल्यात् तल्लताजननपालनसेचनवर्धननामकरणपरिणयादिकं सर्वमपि शकुन्तला मातृभावमापन्ना स्वयमेव साभिमानं सवसंतोषं च निरवर्तयत् । अत एव प्रथमाङ्के "त्वत्तोऽपि तातकाश्यपस्य आश्रमवृक्षकाः प्रियतरा" इति सखीवाक्येन नासूयाकुला भवति । प्रत्युत "न केवलं तातनियोग एव, अस्ति मे सोदरस्नेह एतेषु" इत्यनेन तत्र तरुलतादिसेवनकर्मणि स्वस्य स्वारसिकीं प्रवृत्तिं सौभ्रात्रस्नेहं च स्वमुखेनैवाविष्करोति । न केवलं शकुन्तलाया एव किंतु मुनिकुलमण्डनस्य कश्यपस्यापि तरुलतादिषु तथाविधमेव प्रेम गोचरीभवति । अत एव सः नवमालतीकुसुमपेलवामपि शकुन्तलां तदालवालपूरणे नियोजयति । काश्यपमुनेः प्रेमचक्षुषि न कोपि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विशेषः शकुन्तला–वनज्योत्स्नयोः । शकुन्तलायाविषये यावती चिन्ता तावत्येव आश्रमलताविषयेऽपि । यथा शकुन्तला अनुरूपं पतिं संगच्छेतेति तदीयाशा तथैवाशासीत्तद्विषयेऽपि । इयं वनज्योत्स्नापि अनुरूपपादपसंगता भवेद्वा नवेति महती चिन्ताऽसीत् मृदुमनसो महामुनेः। अत एव अनुरूपभर्तृगामिन्या शकुन्तलया सह चूतसंगतां नवमालिकामप्यभिनन्द्य आनन्द्य कृतकृत्यतां निश्चिन्ततां चात्मनो निवेदयति "चूतेन संश्रितवती नवमालिकेयम् अस्यामहं त्वयि च संप्रति वीताचिन्त" इत्यनेन । एवमन्योन्यैर्बहुविधैरुदाहरणैः कालिदासस्यैव निसर्गप्रेम मुख्यतोऽभिव्यज्यते । तथास्मिन्नङ्के पशुमानवयोर्मिथो मधुरबान्धवमपि चातुर्येणैव सम्यगेव प्रदर्शितम् । मानवीयहृदये पशुपक्षिविषये इयती अनुकम्पा ईदृशी प्रीतिः एतावानभिमानः एतादृशी चात्मीयभावना च शाकुन्तले इव नान्यस्मिन् कस्मिन्नपि पुस्तके प्रदर्शिता समुपलभ्यते। प्रयाणसमये शकुन्तलायाः मनसि गर्भभरालसाया हरिण्याः सुखप्रसवचिन्ता बलीयसी वर्तते । अत एव सा तत्प्रसूतिक्षण एव सुखप्रसववार्तां निवेदयितुं "कमपि प्रियनिवेदयितृकं" प्रेषयेति पितरं प्रार्थयते । प्रियनिवेदयितृ इत्यनेन तत्प्रसवस्य स्वप्रियत्वं व्यञ्जयति । अत्र केवलं पुरुषा एव पशुपक्षिप्रभृतिषु निष्फलं प्रेम कुर्वन्तीति न, किंतु तेऽपि पशुपक्षिणः साविशेषज्ञमानवसाधारणतया स्वान्तरालोद्रिच्यमानं प्रेमाणमाविष्कुर्वन्ति । शकुन्तलायाः प्रयाणं मूकशोकविह्वलः मृगपोतः वसनाञ्चलमाकृष्य निरुणद्धि सप्रेमभरम् । स्वाभिप्रायाविष्करणशक्तिरभविष्यद्यदि तस्य मृगशिशोः, तदा तदीयकरुणाक्रन्दनं कश्यपस्य शोकश्लोकापेक्षयापि हृदयद्रावकं करुणाजनकं चाभविष्यत् । किं करोतु वराकः मूकः अविषह्यशोकः एकः सः हरिणपाकः केवलं स्वनिषेधसूचकचैलाञ्चलाकर्षणं विना । तथाविधस्य शकुन्तलामृगपोतयोः परस्परानिरूढसुदृढप्रेमभावस्य कारणमपि सहृदयहृदयहृदयंगमया भङ्ग्या विवृणोति भगवान् काश्यपः । "यस्य त्वया व्रणविरोपणमिङ्गुदीनां तैलं न्यषिच्यत मुखे कुशसूचिविद्धे । शामाकमुष्टिपरिवर्धितको जहाति सोयं न पुत्रकृतकः पदवीं मृगस्ते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अनेन श्लोकेन शकुन्तलाया मृगविषये कियती प्रीतिरासीदिति ज्ञायते। मृदुहृदया माताऽपि स्वतनुजातेऽपि किमितोधिकप्रेमाणम् आकलयति। अत एव अत्र काश्यपः "ते पुत्रकृतकः" इत्यनेन एकेनैव शब्देन शकुन्तलाहृदय-पिण्डगतं मृगविषयकं सर्वमपि प्रेमरसं प्रकटयति। सत्यमत्र "वत्स" इति प्रेमपूर्णं संबोधनं क्षणं विस्मारयति वाचकानां तत्र मृगबुद्धिम्। भवेदयं कोपि शकुन्तलायाः औरस एव हृदयजातः पुत्र इत्येव बुद्धिरुदेति। "वत्स किं मामनुसरसि सहवापरित्यागिनीम्" इति तस्या आत्मनीननैष्ठुर्यनैर्घृण्यनिदर्शकं वाक्यमुनुवाच्य स्वयमेव गलान्ति नयनयुगलादमन्दं बाष्पबिन्दवः सप्रयत्नं सब्रह्मचारिपरिहासभिया निरुद्धा अपि। शकुन्तला स्वप्रयाणसमये तं मृगशिशुम् अनाथं कृत्वा नैव गन्तुमुत्सहते। "मया विरहितं त्वां तातः चिन्तयिष्यति" इति आत्मविश्वासं स्वयमेव प्रथमतः प्रकटीकृत्य पितुः संमत्यसंमती अविचार्यैव तच्छिरसि तत्संरक्षणभारं बलादेव स्थापयति। तन्मृगविरहावसरे शकुन्तलायां बाष्पप्रवाहस्य यावान् महानापूर आगतः न तावान् पुरा पश्चाद्वा कदापि। अन्ततः कण्वऋषेः एतत्कथनमावश्यकमापतति यत् "बाष्पं कुरु स्थिरतया विहतानुबन्धम्"। यतो बाष्पपिहितनयनतया पदानि विषमीभवन्तीति। अनेन च अनिवार्येण बाष्पमहापूरेण शकुन्तला मृगवियोगावसरे कीदृशं वैक्लव्यं कियच्च कातर्यमनुभूतवतीति स्फुटमवगम्यते। एवमस्मिन्नङ्के प्रतिपदं कालिदासस्य निसर्गप्रेम प्रकृतिपूजनं तिर्यक्सौहार्दं चेतनाचेतनवस्तुबान्धव्यं चेत्येवमादीनि वैशिष्ट्यानि विमर्शकवाचकानां रसज्ञचक्षुषोर्गोचरतामुपयान्ति।

[शिवमग्रे]

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कागदम् वा कागदः

कागदम् इति शब्दोच्चारणेन सम्प्रति बहुतरजनानां मनसि यद्वस्तु प्रतीयते तत्सर्वे नगरवासिजना जानन्ति खलु।आधुनिके जगति कागदं कदापि कुत्रापि न दृष्टमेवंभूतो नरो दुर्लभः खलु पुरवासिजनमध्ये।

अत्रैव वाचकगणस्य यथायोग्यं क्षमायाचनानन्तरं स्वल्पविषयान्तरदोषं स्वीकृत्य "कागद" शब्दोत्पत्तिविषयकं किमपि विवृणोमि। "कागद" इति यः शब्द उच्चार्यते अस्माभिः स न गीर्वाणवागुत्पन्नः सत्यत्वेन। यदि कोऽपि शोधकस्तल्लब्धये शब्दरत्नाकरादि गीर्वाणनिघण्टून् पठेत् तर्हि स भग्नमनोरथ एव भवेत्। कुत इति चेदयं शब्दोऽस्तीति नाम्नी या यावनी भाषा विद्यते तद्भाषोत्पन्नो वर्तते। तस्यामसौ "कागज" इति "ज" कारान्तो विद्यते। परं गीर्वाणवाणीप्रवेशसमये स "ज" कारः "द" कारे पर्यवर्तत। एवं स शब्दः "कागद" इतिरूपेण प्रसिद्धिमगमत्। आस्ताम्। परमस्मिन्नेव समये कथनीयं युक्तं खलु भवेत्—यत् तत्कागदशब्दस्य परभाषोत्पत्तिमत्त्वात् तस्य व्याकरणे लिङ्गम् अनिश्चितमभूत्। एवं केचन कागदः इति पुल्लिङ्गे व्याकुर्वन्ति पुनश्च केचन कागदम् इति घोषणेन तस्य नपुंसकलिङ्गम् स्थापयन्ति। अत्रोदाहरणमिषेण कथयामि "बाग" शब्दः फारसीनाम्नी या यावनी भाषा तदुद्भूतो वृतोऽस्ति महाराष्ट्रभाषयोद्यानमित्यर्थे। एवं "चांगला बाग" तथा "चांगली बाग" इति लिङ्गद्वयेन (अस्त्रियाम्) बुध्यते महाराष्ट्रभाषायाम्। मयापि एवं "कागद" शब्दो मम लेखे अस्त्रियामुपयुक्तो यथाकालम्। एवं कागदशब्दोत्पत्तिविषयं तथा तल्लिङ्गविषयं स्पष्टीकृत्य पुनश्च व्याख्येयवस्तु वर्णयामि।

अदृष्टकागदो नरो दुर्लभः खलु नगरे। यदि कोऽपि नरः स्वयं नोपयुनक्ति तर्हि तस्य दृष्टिगोचराणि भवन्ति खलु कागद—पत्राणि। जीर्णानि विदीर्णानि भवन्तु वाऽऽहोस्विद् वीथ्यामिततस्ततः पवनेनान्दोलितानि दृग्गो-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

चराण्यवश्यं भवन्ति कागदशकलानि खण्डानि वा। एवंविधं बाहुल्यं भूरित्वं विद्यतेऽस्माकं नगरप्रदेशे कागदानाम्। यदि कोऽपि ब्रूयान्नगरवासिजनेनामुकेन कागदं न दृष्टं तर्हि सुनिश्चितं खल्वेतद्यदसौ अमुकजनो दृष्टिहीनो ननु। घोरकान्तारस्था यथा च भिल्लगोण्डजातिधनुर्धारिनरा अदृष्टकागदा सम्भवेयुः। यदि ते पौरान् पृच्छेयुः कागदः कथंरूपो वर्तते तर्हि तेषां तदज्ञानं सुशकम् तथा क्षम्यं खलु। कथमिति प्रश्ने विचारिते सति कागदानि न नैसर्गिकवस्तूनि यथा तृणकाष्टवनस्पतयः। परं तद्वस्तु कृत्रिममर्थात् मानवनिर्मितं यन्त्रसाहाय्येन अल्पाधिकप्रमाणेन। यदि शुष्टिबीजं मरीचबीजं वा किमपि शाकबीजं युक्तरीत्या तथा योग्यस्थान उप्तं भवेतर्हि गच्छता कालेन तद्बीजं तरुरूपेण वा गुल्मरूपेण प्रत्येति दृष्टिम्। न तथा कागदानि। एवं मम कथनीयमस्ति दैर्घ्येण। इत्येवंविवरणं कागदप्राचुर्यदर्शनार्थम्। आस्ताम्।

नगरस्थजनानामर्थे कागदान्यत्यावश्यकवस्तुमध्ये आलेख्यानि खलु। तेषां जीवनार्थं यथान्नजलवायुत्रयमावश्यकं तथा कागदं हि तत्त्रयीतुल्यं भवेत् इति निश्चप्रचम्। विलोकयन्तु प्रियवाचकाश्चतुराः स्वमनसि। नगरे जनैः कागदमुपयुज्यते सर्वेषु सुनिश्चितपरस्परव्यवहारेषु। अहो सुधारणामापने कागदनिर्मितिर्वोपयोग एकं प्रमाणमिति गण्यते। यत्र कागदव्ययोऽधिकस्तत्र सुधारणोच्चतरेति भण्यते मीमांसकैः। यथाधुना राष्ट्रस्य सुस्थितिरनुमीयते जलव्ययेन वा तत्रस्थराजपथानां संख्यया वा दैर्घ्येण, आयुषो दैर्घ्यमनुमीयते प्रति मनुजं दुःखास्वादनेन, तथा हि सामान्येन मानवस्य सुस्थितिः सम्बुध्यते कागदोपयोगेन। यस्य किमपि द्रव्यं नास्ति, गेहं नास्ति, कृषिगोधनादि नास्ति, कुसीदं न वर्तते, उत्तमर्णत्वमधमर्णत्वमज्ञातं खलु तस्य न्यायालयगतकागदपत्रकैः किं प्रयोजनम्। किमपि न। नग्नक्षपणके ग्रामे रजकस्य किं कार्यम्। विमर्शयन्तु तर्ककुशला वाचका विधिज्ञानां (वाक्कीलानां) गृहे कियन्ति पुस्तकानि पत्रकाणि वा सुबद्धानि सुवेष्टनस्थापितानि दरीदृश्यन्ते

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कपाटालङ्काररूपाणि । परं काष्टविक्रेतुर्गृहे पुस्तकदर्शनमपि सुदुष्करं भवति । आस्ताम् ।

अथकागदप्रकारास्तथोपयोगाः । (१) सामान्यजनार्थं पत्रलेखने भृशं समाश्रीयते कागदः। एष प्रायः स्पर्शमृदुः श्वेतो वा सुरुचिरो दृष्टितोषकवर्णः प्रशस्यते जनैः । (२) पुस्तकमुद्रणे नियुक्तः कागदसम्भारो न बहुसुखस्पर्शः न बहुश्वेतस्तथा न वर्णेन मनोहारी अपेक्ष्यते । परमानीलो वा सितो भवति । (३) वृत्तपत्रमुद्रणे नितान्तं सुमहदुपयोगो वर्ततेऽखिल भूतले । इति वदन्ति प्रतिशतं पञ्चाशदधिकमुत्पादनं कागदस्य व्ययीभवति वृत्तपत्रप्रकाशने एव । एष कागदः प्रायः स्पर्शकर्कश अपीतारक्तस्तथा हीनजातीयो हीनमूल्यो वर्तते । वृत्तपत्रवाचनानन्तरं तत्पत्रं गतास्वादं भवति तस्मात्तदनुपयुक्तं वस्तु इति कृत्वा यत्रकुत्रापि वाणिज्यवेष्टनादिकार्थमुपयुज्यते जनैः । (५) कागदचलन [नोट] मुद्रणार्थं यथा पञ्चरूप्यकमूल्यानि वा दशरूप्यकमूल्यानि वाऽधिकरूप्यकमूल्यानि कागदशकलानि सर्वकारः मुद्रयति । एष कागदः भृशं चिक्कणो बहुवर्षजीवी अपेक्ष्यते तथा च स शतशतजनहस्तग्राह—प्रतिग्राहक्षमोऽपि भवितुमर्हति । तथा च न्यायालयगतोट्टङ्कितकागदशकलानि मुद्रयति सर्वकारः । एष कागदोऽपि भृशं चिक्कणो भवितुमर्हति । (६) वस्तुप्रेषणे तथा स्थापने युक्ताः करण्डकाः। उदाहरणार्थं विद्युद्दीपाण्डरक्षणप्रेषणार्थं करण्डका रच्यन्ते स्थूलपीतघनकागदानाम्। (७) मषीशोषकाः कागदाः वर्तन्ते स्पर्शरुक्षाः प्रायः रक्तवर्णीयाः । (८) शारीरमलशोधनार्थं पाश्चात्याः भृशमुपयुञ्जन्ति कागदखण्डानि । तत्र रथ्यासु ष्ठीवनं गर्हणीयं मन्यते । अतः पान्थाः कागदखण्डे ष्ठीवनानन्तरं तत्खण्डं कोटरे संस्थाप्य योग्यस्थाने तन्मलिनं खण्डं क्षिपन्ति।(९) भित्तिशोभावर्धनार्थं श्रीमन्तो भृशमुपयुञ्जन्ति पाश्चात्य (५) देशेषु । भित्त्युपर्यास्तीर्यते कागदो यथा भित्तिशोभा वर्धते । श्रीसयाजीरावमहाराजगायकवाडराजेश्वराणां प्रासादे उटकमण्डस्थाने लेखनेन दृष्टा ननु एवमास्त्रीणा मित्रयः । एते कागदाः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सुबहुमूल्या भवन्ति। प्रतिहस्तद्वयदीर्घकागदं रूप्यकपञ्चकमूल्यं वर्तते। उपरिकथितनवप्रकारेभ्यो भिन्नैरन्यैर्बहुप्रकारैः पाश्चात्या कागदमुपयुञ्जान्ति।

(क्रमशः)

संपादकालोकः

मुम्बाप्रान्तेऽपि "राजकवि" प्रथाऽऽवश्यकी

भारते सर्वप्रान्तेषु सर्वकारमान्याः महाविद्यालय-परीक्षासमित्यादयो बह्वयः संस्थाः संस्कृतविद्याप्रसारे बद्धपरिकरा विद्योतन्ते कार्यक्षमाः। यत्र शतशो विद्वांसोऽध्यापयन्ति विविधानि शास्त्राणि। अधीयते च सहस्रशः छात्राः सानन्दभरम्। परीक्ष्यन्ते चायुताधिका विद्यार्थिनः, सम्मान्यन्ते च पदवीदानादिना। अस्मिन्नेव वर्षेऽचिरपूर्वमेव मद्रप्रान्तीयसर्वकारेण विद्वद्भ्यः सोर्णवस्त्रं सहस्रदक्षिणापुरस्सरं "राजकवि" विरुददानेनेतरप्रान्तीयसर्वकारै रवश्यमनुकरणीयं सर्वश्लाघनीयं नितान्तमभिनन्दनीयं भारतसंस्कृतिसर्वस्वाय-मानायां संस्कृतभाषायामसाधारणमात्मीयमभिमानमाविष्कृत्य प्राचीकशत्समये निजोचितकार्यकरणकौशलम्। एतत्पदवीदाने मद्रप्रान्तीयैः संस्कृतपण्डितैः व्यक्तिशो वा संघशो वा न किमप्यान्दोलनं कृतम्। संस्कृतविदुषां संघीभव-नस्यान्दोलनस्य च कथैवाश्रुतपूर्वा। तत्रत्यजनैरपि साटोप-साग्रहप्रार्थना व्यथायीति किंवदन्त्यापि न श्रूयते। तथापि प्रान्तीयसकलवाङ्मयसमुन्नयना भिनिवेशिना समुचितकार्यविचक्षणेन मद्रप्रान्तसर्वकारेण स्वयमेव स्वीयप्रान्त-सर्वभाषाकवयः सम्मानिता विद्यापक्षपातिना। अस्मदीय मुम्बाप्रान्तेतु सर्वं विलक्षणमेव। सर्वकारः स्वयं न विचारयति। जनाश्च सर्वत्रौदास्यमावहन्ति। जनप्रार्थनामन्तारा सर्वकारो नाऽस्मिन्विषये धत्ते मनः। एवं च मुम्बाप्रान्तं संस्कृतभाषाप्रसारविमुखं महते खेदाय कल्पते विचारशालिनाम्। अतः सर्व-कारमेव साग्रहं प्रार्थयामो यत् जनप्रार्थनानपेक्षमेव संस्कृतपरीक्षासमितिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्थापनीया । संस्कृतसूरयोऽपि समभ्यर्हणीयाः पदवीदानादिना । अस्मिन्प्रसङ्गे संस्कृतप्रणयिनोऽपि संप्रार्थ्यन्ते—पतिनगरं प्रतिग्रामं प्रतिसंस्थं च सभां सम्मेल्य संस्कृतपरीक्षासमितिस्थापनाय पदवीदानाय च मुम्बाप्रान्तीयसर्वकारः सत्वरमेव प्रवर्ततामिति प्रस्तावः निर्णीय मान्यमन्त्रिमण्डलाय प्रेषणीयः साग्रहंप्रार्थनापुरस्सरम् । येन जनतासर्वकारः स्ववचनानुसारमचिरादेवास्मिन्कार्ये प्रवर्तेत समनोयोगम् । इदानीं सर्वकार्यसिद्धिरान्दोलनसापेक्षेति न विस्मरणीयं संस्कृतप्रणयिभिरिति संसूच्यते ।

श्रीः

संस्कृतपण्डितानां दुःस्थितिः तन्निवारणोपायश्च

सांगली राघवेन्द्राचार्यः (काव्यतीर्थः)

अयि मधुरवाणीप्रियवाचकमहाशयाः सर्वे भवन्तः जानन्त्येव पुरा संस्कृतविदां कियती उन्नतस्थितिरासीत् कियान् आदरः जनसमुदायेषु इति । परमिदानीं न खलु राजादरः नापि जनादरस्तेषाम् । प्रत्युत अनादरः सर्वत्र केवलं न श्रूयते नाप्य वलोक्यते, किन्तु अनुभूयते एव प्रत्यहं प्रतिक्षणम् । एवं निराश्रयाः पण्डिताः अनाथवत् कालं नयन्ति यथा कथंचिदस्मिंल्लोके ।

आत्मनः समप्रमायुष्यमेव न्याय-व्याकरणमीमांसा—वेदान्तसाहित्यादिविषयाणामध्ययनाध्यापनेन नयन्तः केचन पण्डितप्रवराश्च स्वपुत्राश्च वयमिव संस्कृताध्ययनेन अतिकष्टां दशां मानुभवन्तु इति परंपराप्राप्तां पद्धतिं परित्यज्य आंग्लशालां संप्रेषयन्ति ससंतोषम् स्वसुतान् । पुरा संस्थापिताः काश्चित् पाठशालाः विद्यार्थिनामभावात् संमार्जनाद्यभावाच्च जीर्णतां यान्तीदानीम् । किंबहुना च्छात्रादिनिलयेषु मठेष्वपीयमवस्था । ये केचन पूर्वं संस्कृताध्ययने नितरां कृतपरिश्रमाश्चाधुना किमिति मया एतावत्कालं वृथा परिश्रमः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कृतः। एतेन नूनं पुरतः सुखं नलभ्यते इति सतीं भार्यां दुष्टपतिरिव तां संस्कृतविद्यां परित्यज्य अन्यामाश्रयन्ते सादरम्। अपरे च केचन विद्यार्थिनः यद्भावि तद्भवतु इति दृढमनस्कास्तत्रैव संलग्नाः भवन्ति। तानि तानि शास्त्राणि सम्यगधीत्यातिपरिश्रमेण विद्वान् शिरोमणि आचार्य शास्त्री तीर्थ, पदवीभाजो भवन्ति। परं ततः जनेषु तेषां आदराभावात् उपजीविकासाधनाभावाच्च अत एव विवाहाद्यभावाच्च कथं नु पुरतः अस्मिन् महर्घे काले अस्माकं कुटुंबानां च उदरपोषणं कार्यमिति सदा विचारमग्नाः किंकर्तव्यतामूढाः संभवन्ति।

अयि वाचकवरेण्याः एवं किल प्रायो दरीदृश्यते संस्कृताध्येतॄणां स्थितिरिदानीम्। संस्कृतज्ञानामिमां संप्राप्तामवस्थां दूरीकर्तुमेक एवत्रोपायः प्रस्फुरति मे मनसि। यदि तत्र तत्र प्रान्ते स्थिताः पण्डितप्रवराः परस्परं आन्तरिकं कलहं संत्यज्य विशालान्तःकरणाः सर्वजनसामान्यदृष्टयो भूत्वा ऐकमत्येन तत्र तत्र संघान् संस्थाप्य तन्मुखेन उपजीविकार्थं जनेषु संमानार्थं सर्वकाराधिकारिणां सन्निधौ प्रयत्नः क्रियेत तर्हि अवश्यमेव सत्वरं कार्यसिद्धिः स्यादित्यत्र नास्ति संशयलेशोऽपि इतिशम्।

संस्कृतं राष्ट्रभाषा

अनुबन्धः

पैत्ताम्बाडि व. रामानुजाचार्यः

"आंग्रेजवत् संस्कृतमेव राष्ट्रभाषा भवितुमर्हती" ति डाक्टर शि. आर. रेड्डियारः वदति। किञ्च हिन्दीतः इदमेव श्रेष्ठमिति वादं करोति॥

मद्रास जून २८ दिनमणिपत्रिकायामेवं लिखितम्। स्वतन्त्रभारते आंग्लमिव भूयात्संस्कृतं राष्ट्रभाषा इति आन्ध्रसर्वकलाशालायामुपाध्यक्षः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

डाक्टर सि. आर. रेड्डियारः कञ्चित्स्निग्धं प्रति लिखति । लिखितं चेत्थं—

भवतां कलाशालासु हिन्द्या एव प्राधान्यं भूयात् इति भवतामभिनिवेशं सम्यग्जानामि । काचिद्भाषणभाषैव राष्ट्रभाषा भवितुमर्हतीति निर्बन्धः तदा हिन्द्येव युक्ता । तथाऽपि हिन्दीतः संस्कृतमेव श्रेष्ठतममिति ममाभिप्रायः । किमितिचेत्, बङ्गाली, हिन्दी, महाराष्ट्री, गुर्जरी, नेपाली काश्मीरीभ्यः मूलमिति निश्चिनोमि । अस्मिन्भारते प्राकृतभाषाणामपि संस्कृतमेवोद्धरणसाधनं वर्तते । अस्मदार्य—बौद्धकलाचारगतिः तिब्बेट, चीना, सैबिरिया, इत्यादि द्वीद्विपान्तरप्रवृतिः संस्कृताद्ज्ञातुं शक्या । भारते आंग्रेज्युत्थाने संस्कृतमाद्रियामहे । भाषणभाषास्थाने हिन्द्येव युक्ता । राजकीयकलाशाला, व्यवहारशाला, निर्वाहादिषु भाषणभाषैव भवितुमर्हतीति न निर्बन्धः । भारते अभाषणभाषायाम् आंग्रेज्यामेव व्यवहारशालादिषु आगतायां सत्यां ततोऽपि सौकर्यतः स्वतश्च बुद्धिमनोऽनुकूलं संस्कृतं किमिति तत्स्थाने न निवेशयितुं योग्यम् ? । चिन्नस्वाम्यादिशास्त्रिणां श्रवणमधुरं सम्यक् संभाषणं श्रुतम् । नाहं संस्कृत पण्डितः । तथापि तद्भाषणं सानन्दमशृणवम् ॥

पञ्चशताब्दं पारसीकमेवासीत् राष्ट्रभाषा । संस्कृतं स्वतः भाषान्तरेषु च प्रसृतं त्रिभागेषु द्विभागविशिष्टं वर्तते । कालेनानाहतं च । कलाचारवतां संस्कृतमेव प्रधानभाषा । हिन्द्यां प्रान्तमात्सर्यं भवेत् । महाराष्ट्रादिप्राकृतभाषाणां सहोदरीवास्ति । तदा किमित्यद्योत्तमं स्थानं देयम् । संस्कृतभाषातु सर्वभाषाणां माता । अतः संस्कृतभाषा सर्वा भाषा अपि प्रमाणयन्ति । उपयोगादिषु द्राविडान्ध्रेभ्यः हिन्दीभाषिणः किमित्यधिकसौकर्यं करणीयम् । इदमिव पाकिस्थानस्य पारसीकमेव राष्ट्रभाषास्थानमर्हतीति मदभिप्रायः । संस्कृत—पारसीकयोरपि किञ्चित्सादृश्यमस्तीति ज्ञायते ।

तस्मात् अन्यप्रान्तीयसरकारमन्त्रिमण्डलमपि यदि संस्कृताभिमानि स्यात् तदा संस्कृतं राष्ट्रभाषा भवेदेव । तथा भवितुं श्रीशमेव शरणं वृणुमः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.